International Journal of Jyotish Research: 2018; 3(1): 26-28

International Journal of Jyotish Research (वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2018; 3(1): 26-28
© 2018 Jyotish
www.jyotishajournal.com
Received: 21-11-2017
Accepted: 25-12-2017

**डॉ. इन्दुमती सिंह**
पूर्व शोध छात्रा, संस्कृत एवं प्राकृत भाषा विभाग, लखनऊ विश्वविद्यालय, लखनऊ, उत्तर प्रदेश, भारत।

**Correspondence**
**डॉ. इन्दुमती सिंह**
पूर्व शोध छात्रा, संस्कृत एवं प्राकृत भाषा विभाग, लखनऊ विश्वविद्यालय, लखनऊ, उत्तर प्रदेश, भारत।

# भारतीय शिक्षा पद्धतौ दिग्विजयनाथस्य योगदानम्

**डॉ. इन्दुमती सिंह**

**प्रस्तावना**

गोरक्षपीठाधीश्वर पदे विराजमानो महन्त अवेद्यनाथः कथितवान् यत्पूज्य ब्रह्मलीन महन्त दिग्विजयनाथ जी महाराजस्य जीवनं भारतीय संस्कृतिः, धर्म, शिक्षा संस्कारः एवं आदर्शः, एतेषां विषयाणां कृते समर्पितमासीत। समये हिन्दू वर्गस्य कृते एकः प्रकाश स्तम्भ रूपेण आसीत् सः बालरूपेण देशस्य क्षितिजे स्वर्णिम आभा विकीर्णं कुर्वन् उदितोजातः तथा च हिन्दू वर्ग एवं धर्मस्य रक्षायै संलग्नो भूत्वा मध्याह्नस्य सूर्यस्य सदृशं उदितो भूत्वा असौ स्व प्रतिभायाः प्रखर आलोकेन समग्र देशमालोकितम् कृतवान् सम्प्रति असौ महन्त दिग्विजयनाथः स्मृति शेषः, एकः कर्मठ कर्मयोगी सदृशं व्यक्तित्वं तस्य जीवनं संघर्षे विकसितं जातमासीत्, महन्त दिग्विजयनाथ महाराजेन परोपकार विषये श्लोक माध्यमेन कथितमस्ति यत् –

वदनं प्रसाद सदनं सदयं हृदयं सुधामुचो वाचः।
करणं परोपकरणं येषां केषा न ते वन्द्याः।।[1]

धर्म, शिक्षा, समाज आदि राष्ट्र सेवायाः विविध क्षेत्रेषु सः सुदृढ़ रचनात्मक कार्य कृतवानस्ति, असौ तस्य स्मृतेः सजीव सुरक्षार्थं पर्याप्तं तत्कार्यमस्ति आधुनिक राष्ट्र सेवकानां यदाऽपि इतिहासो विलिखितो भविष्यति युगपुरुषब्रह्मलीन दिग्विजयनाथस्य नाम स्वर्णक्षरेषु अंकितम् भविष्यति, एतादृशो मम् हठ विश्वासोऽस्ति, आधुनिक युगे राष्ट्रस्य सुप्त आत्मानं जागृतं कर्तारः सन्ति तेषां महापुरुषाणां परम्परासु सर सुरेन्द्रनाथ बनर्जी, डा. विपिन चन्द्र पाल, बाल गंगाधर तिलक, लाला लाजपत राय, वीर विनायक दामोदर, सावरकर, महामना पंडित मदनमोहन मालवीय, सरदार पटेल तथा च राजर्षि टण्डन, एते सर्वे परम्परायामासान् तत्र महन्त दिग्विजयनाथोऽपि श्रृङखलायामासीत्। असौ स्वतन्त्रता संग्रामे एक योद्धा सेनानी रूपेण भागं नीतवान्, सः इत्यं विचारयतिस्म यत् देशोऽयं स्वतन्त्र रूपेण भवेत् इति वाञ्छतिस्म, हिन्दू संस्कृतौ संलिप्तानां तत्व ज्ञातानां जनानां सुसंगठित कर्तुं वाञ्छतिस्म, ये जनाः मम ऋषिवर्गाणां तपस्विनां सिद्धानां धर्म नेतृणां तथा च महापुरुषाणां स्व उत्कर्षेण उपलब्धं तथा च सुरक्षितं कृतवन्त आसन्। भारत देशे शिक्षा पद्धति प्रश्नो विकटो जातः।

भारतीय चिन्तका बहुवाराणि प्रयासं कृत्वा सुधारं कर्तुं इच्छतिस्म, परन्तु मूल प्रश्नश्य किमपि संतोषजनकं समाधानं अद्यावधि पर्यन्तं मिलितमासीत् महात्मागान्धिनाः बेसिक शिक्षा प्रणाल्याः प्रचारः कृतः किन्तु शनैः–शनैः इयमपि प्रणाली समाप्तिं गतवती, जाकिर हुसेन समिति द्वारा अस्यां दिशायां कृतः प्रयासोऽपि विफली भूतः, 1967 ईशवीये छागला समिति द्वारा राष्ट्रीय शिक्षा प्रणाल्यां विचारं विमर्श कर्तुं युग पुरुष ब्रह्ममलीन महन्त दिग्विजयनाथोऽपि भागं गृहीतवान्। तदानीं छागला समितेः विचारधारा राष्ट्रीय शिक्षा अनुकूला न प्रतीता, तेन महन्त दिग्विजयनाथोनोक्तं यत् इयं शिक्षा – राष्ट्रीय सांस्कृतिक सामाजिक तथा आर्थिक विकासाय एकं प्रबलं साधनमस्ति, अतः राष्ट्रीय शिक्षा प्राणाल्याः विकासाय सर्वोच्च प्राथमिकता देया, या शिक्षा भारतीय जनेषु देशस्य प्राचीन सभ्यतायां एवं संस्कृतौ आधारितं एकं व्यक्तित्वं विकासं कर्तुं प्रवर्तयेत् वर्तमान भारतीय शिक्षा पद्धतया वास्तविको दोषोऽयमस्ति सा शिक्षा पद्धतिः ''मैकाले'' इति नामधेयस्य 2 फरवरी, 1835 ईशवीयस्य कुख्यातं ''मिनिट'' योजनायां आधारिता अस्ति यस्याः मुख्यमुद्येश्यं तस्यैव शब्देषु अनेन प्रकारेणासीत्, वर्तमान समये एतादृशस्य वर्गस्य निर्माणं कर्तुं प्रयासः कर्तव्यः यः अस्माकं एवं शासनाधीन कोटि जनानां मध्ये द्वि भाषा भाषी रूपेण कार्य कुर्यात् एतादृशानां जनानां वर्ग रक्त रंगे रंजिते भारतीयो भवेयुः किन्तु रुचयः, विचारधारा, नैतिकता तथा बुद्धि दृस्ट्या आंग्लभाषा भाषी भवेत्; लॉर्ड विलियम वैटिंग अयं जनः सर्व कार्य रूपेण इयं प्रस्तावं स्वीकृतं कारितवान् आसीत् यत ब्रिटिश सर्वकारस्य इदं मुख्यं उद्देश्यं भारतीयेषु जनेषु युरोपियन साहित्यं तथा विज्ञानं वृद्धिं गच्छेत्, भारत देशे आंग्ल शिक्षायाः प्रारम्भमाणे सम्पूर्ण शिक्षायाः धनराशिः आंग्ल शिक्षायाः उपरि व्ययं कर्तुं योजना भवेत् मैकाले इत्यस्य जनस्य शिक्षायाः अवमूलनं कर्तव्यम् अग्रे विचारणीयमिदमस्ति यत् भारतीय शिक्षायाः पुनर्गठनं कर्तव्यम् अनावश्यकं बलं दत्तमस्ति। धर्मात् सम्बन्ध हीनता यस्य धर्म अध्यात्मयोः कीदृशोऽपि सम्बन्धो न भूत्वा तथापि दर्शन विषयेऽपि तस्य महन्त

दिग्विजयनाथाय महत्वपूर्णं मतमासीत् असौ कथयति मनुष्यः स्वभावतो मननशीलः प्राणी विद्यते। अरमपि वाक्यं असौ दिग्विजयनाथ महाराजः कथयति यत् कस्यापि जनस्य वा जन सम्भतामवलोक्य यस्यापि जन कार्य वैशिष्ट्यं दृष्ट्वा असौ दिग्विजयनाथ महाराजः श्लोक माध्यमे वर्णति यत् –

दधि मधुरं मधु मधुरं द्राक्षा मधुरा सिताऽपि मधुरैव।
तस्य तदेव मधुरं यस्य मनो यत्र संलगति।।[2]

''आत्मा वा अरे प्रष्टव्यः श्रोतव्यो निदिध्यासितव्यः इति दर्शन बीजम् उद्भावितवान् पाश्चात्य देशेषु आचार विचारयोः किमपि सामञ्जस्यं वादसाद्यते प्रायः भारत वर्षे तु विचारस्यानुसारेणैव आचारोऽपि नियम्यते अन्येषां देशानां जीवन संग्राम एव तथा भीषणोयत् तत्रव्या जनाः जीवन–साधनेष्वेव सर्व समयं यायाचितुं वाधिता भवन्ति, भारतीयास्तु प्रकृतिप्रदत्तानां जीवन साधनानां सौलभ्येन ऐतिकीं चिन्तां विमुच्य पारलौकिकी, चिन्तामेव सततमयन्ति भगवानऽपि अध्यात्म विद्या विद्यानाम्'' इत्युक्त्वा विद्यायिमां प्रधानतया योजितवान् भारते दर्शनस्योदयो वेद काल एवाजायत अंगिरोनामर्षिः ''संगच्छध्वं संवदध्वं सं वो मनांसिजानताम्'' इत्यादिभिर्मन्त्रेस्तस्यैव तत्वस्यान्वेषणाय लोकान प्रेरयन प्रतिभाति, वेद संहितायामङ्कुरितस्य दर्शन द्रुमस्य उपनिष्द काले पल्लवितत्वं जातम्। तदन्तरे सूत्र काले दर्शन द्रुमस्य शाखा विभक्ताः। सोऽयं दर्शन द्रुमः शाखा भेदेन बहुधा विभक्तस्तत्र स्थूलरूपेण प्रथमं द्वौ भागौ वैदिकानि अवैदिकानि च दर्शनानि। अवैदिकानि दर्शनानानि नास्तिक दर्शन पदेन व्यह्वियन्ते सत् वैदिकानि आस्तिक पदेन व्यवह्वियन्ते। न्यायदर्शनम् न्याय शास्त्रमति प्राचीनतम्। अस्य शास्त्रस्य प्रवर्तकः सूत्रधारः गौतमः 500 ईशवीय पूर्व समयेऽजायत गौतम पूर्ववतिं न्याय शास्त्रं पदार्थमिमांसा शास्त्रम्। वात्स्यायन भाष्योन्तानां सिद्धान्तां खण्डनं दिङ्नान नामकेन बौद्ध नैयायिकेन स्व कृते प्रमाण समुच्चय नामके ग्रन्थे कृतम्। प्रमाण मीमांसायां व्याप्ततो गङगेशोपाध्यायः तत्व चिन्तामणि नामकं ग्रन्थं निर्माय नब्यन्यायं प्रवर्तयामास तस्य कालः द्वादश शतकम् ज्ञानान्मुक्तिरिति सर्ववादि सिद्धं परन्तु शुद्धं ज्ञानं कथं अप्यते इदमेव वस्तु मीमांसयितुः न्याय शास्त्रं प्रवृत्तम्। तत्र प्रमाण प्रमेय शंशय प्रयोजन दृष्टान्तावयव तर्क निर्णयवाद जल्प वितण्डापि निग्रत स्थानानां यथार्थ ज्ञान निःश्रेयसिद्धम्। इति तत् सिद्धान्तः। सांख्यदर्शनम् – सांख्य दर्शनास्याद्य आचार्यः कपिल उपनिषदकालिक ऋषिः अयं ग्रन्थो विक्रम प्रथम शतके निर्मितस्य प्रसिद्धस्यास्य ग्रन्थस्य चीन भाषानुवादं षष्ठ शतके समपाद्यत सोऽयमनुवादः सम्प्रत्यसि प्राप्यते।

बुद्ध प्रचारितमतस्योपरि शांख्यदर्शनस्य महान प्रभावो दृश्यते दुःखस्य सत्ता वैदिक क्रिया कलापस्यानुभ्युपायतया गौणभावः ईश्वरेऽनास्था जगतः परिणामशीलता इत्यादयः सिद्धान्ताः बौद्धैः सांख्यादर्शनादेव गृहीताः। अत्र मते पञ्चविंशतितत्वानि– मूल प्रकृतिः, महान, अहंकार, शब्द स्पर्श, रूप, रस, गन्ध तन्मात्राणि पञ्च एकादशेन्द्रियणि, पञ्च महाभूतानि।

योगदर्शनम–योगः प्राचीन इत्यत्र नास्ति कस्यापि वैभवत्यम्। योग क्रिया नाना सिद्धीनां जननीत्यत्रापि नास्ति विवादः। विक्रम संवत्प्रारम्भतः शतकद्वय पूर्वं महर्षि पातञ्जलिना योग रहस्य प्रकाशनार्थं योगसूत्राणि रचितानि योग दर्शनम् इदम् पादचतुष्टयात्यकम् प्रथम पादे योग स्वरूपस्य विस्तृतं वर्णन निरुपित द्वितीय पादे क्रिया योग साधनानि निरुपितानि।

बौद्धदर्शन–बौद्ध दर्शन जैनदर्शनस्योन्तर काले प्राप्य रूपेण प्रचरितमभवत् बौद्ध दर्शन ग्रन्थेषु भागद्वयं वर्तितमास्ति 1. धार्मिकोभाग, 2. दार्शनिको–भागश्च; धार्मिक भागे आध्यात्मिक तत्व वर्णनम् दार्शनिक भागे तु तार्किकदृष्ट्या बौद्धसिद्धान्तस्य सूक्ष्मं विवेचनं प्रस्तुतम्। बौद्ध दर्शनस्य चरितं सर्वविदितमस्ति तेन 528 ईशवीय पूर्व ज्ञानोदयं प्राप्यं बुद्धपदवी प्राप्ता। ततः स सारनाथ नामक स्थाने भिक्षुम्य उपदेशं प्रदाय धर्मचक्रं प्रवर्तयामास बौद्ध दर्शनस्य प्रधान विषयाः रूप विज्ञान वेदना संज्ञा संस्कार नामक स्कन्ध पञ्चकमेवात्मा न तदन्यः अग्रे जैन दर्शनम्–निगण्ढ़ दर्शनेन व्यवह्वियते–निगण्ढ़ शब्दो ग्रन्थानिगतो निर्गन्थ इति संस्कृत शब्दस्यं पाली भाषायां रूपान्तरम् अर्थ दर्शने सिद्ध पुरूषा ''अर्हन'' शब्दे नाभिधीयन्ते महावीरेण रागादि रिपवो जीता इत्यसौ जिन शब्देनोक्तस्तदीय तथा दर्शनामेदं जैन दर्शन नाम्नाप्यमिहितम्। वैशेषिक दर्शनम्–सकल दर्शनापेक्षया वैशेषिक प्राचीनम्। एतत्प्रणेता कणादः वैशेषिकदर्शनमेव इति नामकरणं कृतम्। दशमिरध्यैः 370 सत्रैश्य निवद्धमिदं दर्शनम्, अध्याये द्वे आहिनके। प्रथमाध्याये समवेताशेष पदार्थ कथनम् द्वितीये, प्रथम, तृतीये आत्मान्तः करण निरुपणम्, षष्ठे अध्याये श्रौत धर्मनिर्वचनम्, सप्तमे गुण समवायः, अस्मेऽध्याये ज्ञानोत्पत्ति तन्निदानम्। नवमेऽध्याये प्रागभावादि निरुपणम्, दशमेऽध्यायेचात्म गुण निरुपणम् दर्शनमिदं सर्वं शास्त्रोपकारकम्।

भारतीय संस्कृतेः परमोपासका महान् दिग्विजयनाथ महाराजेन सर्वेषाम् जनानां चिन्तितं वर्तते यदग्रे कथयन्ति ते विरला एव जनाः केषांचित् अन्येषां विषये ते भाणन्ति यत् विरला एवं जनाः पर हित कार्यं कुर्वन्ति व तद् विषयेऽयं श्लोकः प्रसूतयते–

विरला जानन्तिगुणान् विलारला कुर्वन्ति निर्धने स्नेहम्।
विरला परकार्यरताः पर दुःखेनाऽपि दुःखिता विरलाः।।[3]

अवेद्यनाथः देश विभूतीनां महानुभावानाम् जीवनं सर्व समानुकार्यं भवित, वे खलुपरण पर्यन्तम् देश सेवायै सततं तत्परा भवन्ति। अस्माकं देशस्य महत्वपूर्ण जीवन यापकेषु पुण्यश्लोकोऽयं भवान दिग्विजय नाथे महोदयोऽन्यतमः यस्य जीवनं हिन्दुत्व रक्षायै अशिक्षा दूरीकरणाय सामाजिक कुरीतीनां शैथिल्याय जाततिमि के न जानन्ति विवेचकाः राजनीतौ यादृशेन कुशल नेतृत्वे तेन साफल्यं लब्ध न कैश्चिदपि साफल्यं कैश्चिदपि लब्धं अद्यापि तस्य महत्वपूणैः कायैः श्रद्धावनत् चिन्तोऽहं तस्मिन् ब्रह्मलीन योगि वर्गे सुकुमलेन चेतसा प्रमाणं करोमि, हिन्दूनां घटनाय दन्तमनसे घुर्याय गोरक्षिणाम् दीनार्ते शरणागते कृत दयायापन्न कष्टच्छिदे गीता सम्मत कर्म तत्पर फलानाकाऽक्षिणे योगिने तस्मै दिग्विजयनाथ गुरवे सिंहाय तुभ्यं नमः। परम योगेश्वर गुरुगोरक्षनाथस्य तपस्या पवित्री भूतस्य श्री गोरक्षनाथ मन्दिरस्य मठाधीश पदे प्रतिष्ठतो महादिभः श्री दिग्विजयनाथ। महोदयै भारतीय संस्कृतेः हिन्दुत्वस्य अध्यात्म जगतश्च कल्याणकारि प्रवृत्तीनां प्रचार–प्रसार कार्ये यद्योगदानमृकृतं तत् भारतीयोतिहासे चिरकाल पर्यन्तं अंकितं स्थास्यति अस्माकं संस्कृतिस्तथा तम्यता च इमेऽत्यन्त प्राचीने स्तः, सर्व प्रथमे च मानवस्य सर्वोच्च लक्ष्य प्राप्तिः, तत् सम्बन्धि विचारा अत्र सन्ति संसारेऽन्यः कोऽपि देशोऽस्मान् पराजेतुं न शक्यः न शक्ष्यति च अद्य अस्माकं पार्श्वे ते विचारा आदर्शाश्च स्थिताः सन्ति, ते आदर्शाः सर्वेभ्य उत्तमाः सन्ति ये अस्माभिः स्वीकृयताः सन्ति, येषु अस्माकं विश्वाश्यस्ति, शिक्षैव एकः एतादृशो माध्यमोऽसि यद्द्वारा वयं सर्वे तद्दुदेश्यं प्राप्तुं समर्था भवामः अन्यत् किमपि एतादृशं साधनं नास्ति, वयं यावद राष्ट्रं शक्तिशाली वास्तविक रूपेण मानव हितैषि कर्तुं समर्था भवेमः। किञ्च शिक्षाया उद्देश्यमेव एताद्शमस्ति उचितानुचित्तयोर्मध्येऽनुचितं परित्यज्य उचितस्य ग्रहणं कारयेत्। प्रत्येकं मनुष्याः शिक्षाद्वारा उचितं गृहणीयः अनुचितं च परित्यजेयुः एतादृशं समर्थाञ्च प्राप्तुं शक्युयुः। ब्रह्मलीना महान्तः श्री दिग्विजनाथाः शिक्षायां धर्मस्य प्रेम्णश्च महत्वपूर्ण स्थानं दातुं निरन्तरम् आग्रहम् अकुर्वन। महाराष्ट्रे यत्र धर्म–देश प्रेम–संस्कृतीनां सर्वत्रवरीयताऽस्ति, शिक्षायाः प्रणाली धर्मेण असम्बद्धा भवेदिति वार्ता 1947 ईशवीये लक्ष्मणपुर कारागारे महतां दिग्विजयनाथानां सह्या नासीत् अतएव धार्मिक संस्थानानां शिक्षा व्यवस्थापनेषु प्रमुख रूपेण वार्ता समुद्घोषिता वौरति। अत्रापि देश प्रेम विषये स्वनामधन्यैः महन्त दिग्विजयनाथ महाराजैः स्व विचाराः श्लोक माध्यमेन प्रस्तुताः सन्ति।

सत्यं न सत्यं खलु यत्र हिंसा दयन्वितं चाऽनृतमेव सत्यम्।
हितं नराणां भवतीह येन तदेव सत्यं न तथाऽन्यथैव।।[4]

तस्यैव फलमस्ति यद् इदानीं हिन्दुहृदय भूतानां तेषां पुण्यंश्लोकानां नाम्नासम्बन्धिताः शतशः शिक्षण संस्थाः शिक्षारताः सन्ति। याम्यो देशस्य सेवा प्रतिदिनम् जायमानाऽस्ति, इति। धन्यास्ते हिन्दुजागृतकरा स्वातन्त्र्य सेना गण्याः यैः संस्थापित्त शिक्षा संस्थाभ्यो नैतिका देशप्रेमिणो नागरिकः प्रतिवर्षमुत्पद्यन्ते।

तेषां हार्दिकोऽभिलाषा योग्यतमेपूत्तराधिकारिषु वर्तमान पीठाधीशेषु अंङकुरितः, पुष्पितः, फलितश्च वर्तत इति सुखावहा वार्ताऽस्ति, इति। अग्रेऽपि तस्य महन्त दिग्विजयनाथस्य उत्तराधिकारि पदे विराजमानः पश्चात् विधिवत् महन्त पदे नियुक्तः महन्त अवेद्यनाथः वदति यत् महन्त दिग्विजयनाथ महोदयाः वा महाराजाः कथयन्तिस्म यत् राष्ट्रस्य उद्धारः कथं भवेदिति, इदानीं भारत राष्ट्रस्य स्थितिरतीन भयावहाऽस्ति क्वचिज्जना अनावृद्धि जन्येन दौभिक्ष्येण पीड़िताः सन्ति, अति वृष्टि जनितेन प्रलयेन कुचयित् पक्षिणां प्रकोपः क्वापि ग्रामाणामशेषं भस्मीभावः क्वचित् सामुद्रिक प्रलयेन नगराणां प्लावनम्, कुचयित् लुष्ठकानामातङकः कुचयित् चौराणां भीतिः, कुचयित सतीनां शीलयङजः, कुचयिच्य वालाभिः सह बलात्कारो वोभूयते। किमधिकं कथयामः आधिदैविकेन, आधिभौतिकेन, आध्यात्मिकेन त्रिविधेनाऽपि सन्तापेन राष्ट्रं सन्तप्तमस्ति, अस्योद्धाराय कोऽपि प्रशस्तः पन्था नावलोम्यते, भारत राष्ट्रं प्रति दिनभवतिं प्रति गन्छति कथं च नगच्छेत् तदानीमेक ऐवासीत् हिरण्याक्षः इदानीं तु लक्ष्यशः उत्पनाः सन्ति हिरण्याक्षाः। कथं स्यात् राष्ट्रस्योद्धारः अधुना वेदाभ्यासः वेदविहितानि कर्माणि विधिपूर्णानियज्ञांनुष्ठानानि पुराणानां शिक्षा प्रदा उपदेशाः क्वापि न भवन्ति विविधविषयेषु आचार्यैरपि ब्राह्मणैः सन्ध्या परित्कता वेदाभ्यासः परित्यक्तः वेद विहितानि च कर्माणि परित्यक्तानि, क्षत्रियैर्देशभावना परित्यक्ता वैश्यैः कृषि गोरक्ष वाणिज्यं परित्यक्तम्, शूद्रैश्च देशभावः परित्यक्तः, खाद्याखाद्यस्य पेचापेचस्य, केध्याकेध्यस्य, स्पृश्याऽपृश्यस्य च विचारः प्रायः सर्वैरपि परित्यज्य मानोऽस्ति, ब्राह्मणैः, क्षत्रियैः वैश्यः शुद्रैश्च स्व स्व कर्म परित्य साम्ना, दानेन, दण्डेन, भेदेन च केवलं कुर्सिकां (पदम्) समधिग्रहितुं प्रयत्नवद्भिर्मयते, कस्यापि किमपि कर्म सुनिश्चितं नास्ति राष्ट्रस्य, समाजस्य, हिन्दूत्वस्य च समुद्धारः समुन्नतिर्वा कथं भवेत्। देशस्य मंत्री पद समानानि श्रेयांसि पदानि समधिष्ठितताः लोक सेवार्थं निर्वाचिताः नेत्तार एवं यदि सिद्धान्त विहीनाः, पद लोलुपाः केवलं स्वार्थ सिद्धये तत्परायणाः सन्ति तर्हि कथङकारं स्यात् राष्ट्रद्धारः शिक्षणसंस्थासु राजकीयेषु अन्येषु विभागेषु च नियुक्ताः प्रायः सर्वेऽपि कर्मचारिणो विभागीयं वेतनं पैवृकिं सम्प्रत्तिं मन्यमाना उत्कोचादिना जनतानां रक्तचूषणार्थमेव परायणाः सन्ति –

अपितु – दुखिनः सन्तु सर्वेऽपि सर्वेसन्तु सहामयाः।<br>
सर्वेनिपातं गच्छन्तु भवेयं सुखभोगहम्।।

ईदृशी विद्यते तेषां धारणा कथं नाम स्यात् देशस्य देशवासिनां वा कल्याणम्। आद्योपान्तं तृतीय श्रेणीमेव किं न भवेद् यदि तस्य आत्मीयजनः सम्बन्धी वा उच्चपदे समासीनो विद्यते चेत स एव योग्यतमः सिद्धयति स्थानं च लभते, अपरः पुनराद्योपरान्तं प्रथम श्रेणी लब्धोऽपि उच्च पदे तस्य स्वजनो नास्ति चेद् अयोग्यः सिध्ययति तदेवं स गलीषु–गलीषु अपमानं सहते, योग्यतमो जनः स्थानं लभतामिति भावना प्रायः नास्ति अधिकारि वर्गस्य। एतादृशी पक्षपात् पिशचिनी यदि देशे स्वच्छन्दं नृत्यति चेद् देशज्योद्धारः कथं भवेदिति। इदानीं ये छात्रा सन्ति त एव भाविनोराष्ट्रनायकाः मन्त्रिणः प्रशासकश्च किन्तु वे प्रायः पठन–पाठन वाञ्छन्तोनाऽवलोयन्ते, पठन– पाठनस्य अधिकांशं कालं आन्दोलनादिषु यापयन्ति अन्ते च अकृत्येन कुकृत्येन दान दण्डनादिना च परीक्षां तर्तुं प्रयवन्ते न पुनः समुचितं ज्ञानं आर्जयितुम् ईदृशी भाविनायकानां सिथतिः कथं स्याद् राष्ट्रोद्धारः। अतो विषयेऽस्मिन् सर्वे विचारणीयं चिन्तनीयऽच एकेन किमपि न सिद्धयति सर्वेमिलित्वा कार्यं करणीयम्। वस्तुतो यदि वयं वाञ्छामो यद् भारतराष्ट्रस्योद्धारो भवेत्, पुन रामराज्यं समागच्छेत्। अन्यायोऽत्यचारो वा देशान्तिर्गच्छेदत् सुमिक्षंस्याद् भारत राष्ट्रञ्च चिरत् अक्षुण्णं तिष्ठेदिति तर्हि अस्माभि स्वधर्मे मनोयोगो देयः, कर्मठता, कर्तव्यपरायणता जागरणीया अहिंसा धर्मोऽनुसरणीयः, परोपकारपरायणता आश्रयणीया वेदाध्ययनं वैदिकं कर्म चाऽनुष्ठेयम् पुराणानां शिक्षा प्रदा उपदेशा ग्राह्या सन्ति, वर्णधर्माणां आश्रयधर्माणाञ्च पालनं कर्तव्यम् छात्रेषु च जिज्ञासुत्व प्रवृत्तिजागृतव्या। यदि इत्यं क्रियतेचेत् अचिरेणैव समाजस्य, राष्ट्रस्य विश्वस्य च समुद्धारो भविष्यति तथा च रामराज्यं पुनः समागच्छेत्, सुखं शान्तिश्च जने जने भवेत्। अन्यायस्य – अत्याचारस्य च निर्मूलनं स्यात्

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।<br>
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग भवेत्।।[5]

भावनेयं यस्मात्कालालाद्धनिक वर्गेषु न्यूना जाता। धनिक वर्गे च नानाविद्यानि कार्याणि जातानि अच सर्वमपि सम्पूर्ण राष्ट्रं विविध दुर्व्यसन कार्येषु दुषितं जातम्। येन कारणेन सर्वत्र सर्वोऽपि समाजः कर्तव्य विमुखोजातः। मैत्री करुणादि – गुणशून्य परमार्थ तत्व विचार विकल पृथिवीभारभूतो वर्वति तद्राष्ट्रस्य धनिका जना मूलस्तस्मास्तेषु विकृतेषु सम्पूर्णमपि राष्ट्रमापदग्रस्तं भवदैव राष्ट्रे समानमुद्यज्य–मानाः केचन प्रभुतैरथैर्युज्यते न सर्वैरपि सम्पूर्ण राष्ट्रं धनिकोपार्जित धनं समपेक्षवे तैः समुपार्जितं धनस्य अस्थानेषु असामाजिक जनेषु दुर्व्यसनेषु दुरुपयोग प्रारब्धे समाजसेवकानां कर्णधाराञ्च तेषु नियन्त्रणे शिथिले जाते विविधा – स्वाभाविक भोगाय स्वार्थ पूर्त्यै च सर्वत्र समाजे जन द्रोहः प्रारब्धः वद्दिनादेव प्रतीकारकै दृष्टिभिः स्व देशेऽपि राष्ट्र घातिनां वैदेशिकानां प्रवेशाय मन्त्रणा कृता साहाय्यञ्च तेषां विहितम्। तस्यैवोपार्जित धनस्य दुरुपयोगस्य दुष्परिणामो यदाध्यात्मिक भौतिक साधन सम्पन्नोऽपि अस्माकमयं देशो बहुकाल परतन्त्रता गतः बहु प्रयस्च बहूनां राष्ट्रभक्तानां बहुमूल्यानि जीवनानि समर्प्य स्वतन्त्री भूतेयं परम पवित्रा भारत भूमिस्त्रिंशत्तोमेऽपि वर्षेऽद्यापि बौद्धिक दासतां न परित्यजति। अहो कष्टं सर्वोप्यत्रत्यः समाजः सदा तत्रैव रमते। स्वत्वं स्वप्नेऽपि न चिन्तयति। इतिहासः साक्षी वर्ततेऽत्र आङगलैः हिन्दूनां स्व संस्कृतेः विनाशाय किं किं न कृतम्। उक्तं मया पूर्वमपि यत्सयान रूपेण प्रयतमानेषु कियन्त एव धनिका विद्वासंश्च भवन्ति प्रकृति नियमोऽयं न सर्वैरपि। धनिकानां धनस्योपयोगाय तेषां सारासार ग्राहिणी बुद्धिर्भवेददेश सेवाभावना च सर्वोच्य पदस्थ देश भक्तानां कर्ण धारणाञ्च तेषु यज्ञेषु नियन्त्रणं भेवन्तदैव देशउन्नतः स्यात्। भूत यज्ञस्य भावेयं राष्ट्रस्य भौतिकाध्यात्मिक समुन्नत्यै भावात्मककैकतायै च नितरामावश्यिका न केवलमस्माकं देश एवं परन्तु विश्वस्मिन सर्वत्र प्रसरतु भावनेयम्। यया विश्व शान्तिर्विश्वमैत्री च स्थिरे स्याताम्। महाराजः कथयति यत् –

न दान तुल्यं धनमन्यदस्ति न सत्य तुल्यं व्रतमन्यदस्ति।<br>
न शील तुल्यं शुभमन्यदस्ति न शन्ति तुल्यं हितमन्यदति।।[6]

## संदर्भ सूची


1. नीति शतकम्
2. सुभाषित रत्न भाण्डागारे
3. सुभाषित् रत्न भाण्डागारे
4. श्रीमद्देवी भागवते
5. महाभारते भीष्मपर्वाणि
6. चाणक्य नीतौ